# मनोगतम् [०२.२९]- ८२-उपाख्यानम्

## ‘मनकीबात’, प्रसा.तिथिः - २४-ओक्टोबर’२०२१

[भाषान्तरम् - सर्वश्री-श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः । कोटि-कोटिशो नमस्काराः | अथ च, अहं कोटि-कोटिशो नमस्काराः, एवं कृत्वापि कथयामि यत् शत-कोटि-संख्याकस्य ‘vaccine dose’- इति सूच्यौषध-मात्राप्रदानस्य अनन्तरम् अद्य देशः नवीनोत्साहेन, नूतनोर्जया च अग्रेसरति | अस्माकं सूच्यौषध-कार्यक्रमस्य सफलता, भारतस्य सामर्थ्यं प्रदर्शयति, सर्वेषां प्रयासस्य मंत्रस्य शक्तिं प्रदर्शयति |

सखायः, शत-कोटि-संख्याकस्य सूच्यौषध-मात्राप्रदानस्य संख्या नूनं बृहती अस्ति, परञ्च अनया सम्बद्धाः लक्षशो लघु-लघवः प्रेरकाः गौरवप्रदायिनः च अनुभवाः, अनेकानि च उदाहरणानि सन्ति | अनेके जनाः पत्रं लिखित्वा मां पृच्छन्ति यत् सूच्यौषध-कार्यक्रमस्य आरम्भादेव कथमहं विश्वासम् अधिगतवान् यत् अभियानमिदं एतावत् बृहत् साफल्यम् अवाप्स्यति | दृढोऽयं मदीयः विश्वासः अत एव आसीत्, यतो हि अहं निज-देशस्य, स्वीय-देशवासिनां क्षमतां सम्यक्तया परिचिनोमि | अहं जानन् आसं यत् अस्मदीयाः स्वास्थ्योपचार-कर्मिणः देशवासिनां सूच्यौषध-मात्राप्रदाने किञ्चिदपि नैयून्यं नैव आचरिष्यन्ति | अस्मदीयाः स्वास्थ्योपचार-कर्मिणः निरन्तरं स्वीयेन परिश्रमेण संकल्पेन च नवीनमेकम् उदाहरणं प्रतिष्ठापितवन्तः, ते नवाचारेण साकं निज-दृढ-निश्चयेन मानवतायाः सेवायाः अन्यतमं मानदण्डं स्थापितवन्तः | तैः सम्बद्धानि अगणितानि उदाहरणानि सन्ति, यानि सूचयन्ति यत् केन प्रकारेण ते सर्वाण्यपि समाह्वानानि अतिक्रामन्तः

अधिकाधिक-जनेभ्यः सुरक्षा-कवचं च प्रदत्तवन्तः | वयं बहुशः वार्त्तापत्रेषु पठितवन्तः, अन्यत्रापि श्रुतवन्तः यत् अस्य कार्यस्य अनुष्ठानार्थं अस्मदीयाः एते जनाः कियन्तं परिश्रमं कृतवन्तः, अनेकानि उत्तरोत्तर-श्रेष्ठानि प्रेरकोदाहरणानि अस्माकं समक्षं विराजन्ते |

अहमद्य 'मनकीबात'-श्रोतृभ्यः उत्तराखण्डे बागेश्वरस्य स्वास्थ्यकार्यकर्त्र्या पूनमनौटियालमहाभागया मेलापयितुमिच्छामि। सखायः, एतद्बागेश्वरक्षेत्रं तस्मिन्नुत्तराखण्डे वर्तते यस्मिन् प्रतिशतं शतमितं सूच्यौषधिप्रदानं विहितम् । उत्तराखण्डसर्वकारोऽपि एतत्कृते अभिनन्दनीयोऽस्ति; यतोहि एतदतिदुर्गमं कठिनं च क्षेत्रमस्ति। तथैव हिमाचलेनापि एतादृशीस्वेव काठिन्यपूर्णासु स्थितिषु प्रतिशतं शतमितं सूच्यौषधि-प्रदानलक्ष्यं अवाप्तम् । अहं सूचितोऽस्मि यत्पूनममहा-भागया स्वीयक्षेत्रस्य जनेभ्यः सूच्यौषधि-प्रदानार्थम् अहोरात्रं प्रयासः आचरितः ।

प्रधानमंत्री - नमामि पूनमजी!

पूनमनौटियालः - प्रणमामि महोदय!

प्रधानमंत्री - पूनमजी! आत्मनः विषये देशस्य श्रोतृभ्यः किंचित् सूचयतु।

पूनमनौटियालः - श्रीमन्! अहं पूनमनौटियालः अस्मि। अहमुत्तराखण्डस्य बागेश्वरजनपदे चानीकोरालीकेन्द्रे कार्यरतास्मि। अहं स्वास्थ्यपरिचारिकास्मि।

प्रधानमंत्री - पूनमजी, मम सौभाग्यं यन्मया बागेश्वरागमनस्य अवसरः अवाप्तः। एतत्तु तीर्थक्षेत्रमस्ति यत्रानेके देवालयेत्यादयः वर्तन्ते। अहमतीव प्रभावितः यत्कथम् अनेकशताब्द-पूर्वं जनैः एतत्महत्कार्यम् अनुष्ठितम् ।

पूनमनौटियालः - एवं, श्रीमन्!

प्रधानमंत्री - पूनमजी, अपि भवत्या क्षेत्रस्य सर्वेभ्यः जनेभ्यः सूच्यौषधिप्रदानं सम्पादितम्?

पूनमनौटियालः - आम् श्रीमन्! सर्वेभ्यः प्रदत्तमस्ति।

प्रधानमंत्री - अपि भवत्या किंचित्काठिन्यम् अनुभूतम्?

पूनमनौटियालः - आम् श्रीमन्! यत्र-कुत्रचिद्वर्षा भवति, तत्र मार्गावरोधः जायते । नदीं तीर्त्वाऽपि गम्यते। ये जनाः स्वास्थ्यकेन्द्रेषु आगमने असमर्थाः आसन् तेषां वृद्ध-दिव्यांग-गर्भवती-धातृणां वा कृते एन्.एच्.सी.वी.सी.- इत्यन्तर्गतं वयं प्रतिगृहं गतवन्तः।

प्रधानमंत्री - परं तत्र पर्वतेषु गृहाणि परस्परं दूरस्थितानि भवन्ति।

पूनमनौटियालः - एवं महोदय!

प्रधानमंत्री - तर्हि एकस्मिन्दिने कियत्-कार्यं क्रियते स्म?

पूनमनौटियालः - महोदय! किलोमीटर्-मितानुपातेन प्रायः अष्ट दश वा।

प्रधानमंत्री - अस्तु, ये समतलेषु निवसन्ति ते अष्ट अथवा दश-किलोमीटर्-मितान्तरालं न अवगमिष्यन्ति। परमहं जानामि यत्पर्वतेषु अष्ट अथवा दश-किलोमीटर्-गमनं तु अखिलदिवसे एव सम्भाव्यते।

पूनमनौटियालः - एवं श्रीमन्!

प्रधानमंत्री - सूच्यौषधिप्रदानस्य सामग्रीवहनं कठिनं भवति। अपि भवत्या साकं कोऽपि सहायकः भवति स्म?

पूनमनौटियालः - आम् श्रीमन्! अस्मदीयं पंचजनानां दलमासीत्।

प्रधानमंत्री - अस्तु।

पूनमनौटियालः - तस्मिन्दले चिकित्सकः, परिचारिका, औषधप्रदायकः, आशाकार्यकर्ता, आलेखकश्च भवन्ति ।

प्रधानमंत्री - अस्तु! तत्र सम्पर्कमार्गाः आसन् अथवा बागेश्वरे काऽपि व्यवस्था क्रियते स्म?

पूनमनौटियालः - श्रीमन्, कुत्रचित् उपलब्धः अवर्तत, कदाचिच्च बागेश्वरमागत्य क्रियते स्म।

प्रधानमंत्री - अस्तु। अहं सूचितोऽस्मि यद्भवत्या अनौपचारिकतयाऽपि सूच्यौषधिप्रदानमाचरितम् । एषः विचारः कथमागतः? कथं च भवत्या एतदाचरितम्?

पूनमनौटियालः - अस्माकं दलेन संकल्पितमासीद्यत् कोऽपि अवशिष्टः न स्यात्। अस्माकं देशतः एतद्रोगः पलायितव्यः भवेत् । मया आशाकार्यकर्त्र्या साकं प्रत्येकं ग्रामजनस्य सूचिः निर्मिता। तदनुसारेण ये जनाः केन्द्रे आगतवन्तः तेभ्यः सूच्यौषधिः प्रदत्ता। अवशिष्टेभ्यश्च प्रतिगृहं गत्वा...

प्रधानमंत्री - एवम्? जनाः परिबोधिताः अपि?

पूनमनौटियालः - आम् श्रीमन्! परिबोधिताः।

प्रधानमंत्री - किं जनेषु सूच्यौषधिग्रहणस्य उत्साहः वर्तते?

पूनमनौटियालः - अस्ति श्रीमन्! साम्प्रतं तु जनाः प्रबुद्धाः। आरम्भे समस्याः अवर्तन्त। जनाः परिबोधिताः यदेषा सूच्यौषधिः सुरक्षितास्ति। प्रभाविनी चास्ति। अस्माभिरपि सेवितास्ति। अखिलदलेन गृहीतास्ति। वयं स्वस्थाः भवत्पुरतश्च स्थिताः इति।

प्रधानमंत्री - कुत्रचित् सूच्यौषधिसेवनानन्तरं समस्या अजायत?

पूनमनौटियालः - नैव, श्रीमन्! किमपि न जातम्।

प्रधानमंत्री - न किमपि जातम्।

पूनमनौटियालः - नैव।

प्रधानमंत्री - सर्वे सन्तुष्टाः अवर्तन्त?

पूनमनौटियालः - आम्, श्रीमन्!

प्रधानमंत्री - सर्वं सुष्ठुतया जातम्?

पूनमनौटियालः - आम्, श्रीमन्!

प्रधानमंत्री - अस्तु। भवत्या महत्कार्यमाचरितम् । अहं जानामि यदेतत् क्षेत्रं कियत्दुर्गमं अस्ति। पर्वतेषु पदाति-गमनम् । पर्वते आरोहणं

अवरोहणं च ...। गृहेषु दूरस्थितेषु अपि भवत्या अतिसुष्ठुतया सम्पादितम्।

पूनमनौटियालः - धन्यवादः, श्रीमन्! भवता संभाषणं मम सौभाग्यमस्ति।

भवादृशानां लक्षशः स्वास्थ्यकर्मिणां परिश्रमेणैव भारतेन सूच्यौषधि-मात्राप्रदानस्य शतकोटिमितं लक्ष्यं अधिगतम् । अद्याहं न केवलं भवतीम्, अपि तु प्रत्येकमपि भारतवासिनं प्रति आभारं प्रकाशयामि, येन 'सबको वैक्सीन-मुफ्त वैक्सीन' इत्यभियानं उन्नीतं सफलीकृतं च। भवत्याः परिवारस्य च कृते मम पक्षतः भूयस्यः शुभकामनाः।

मम प्रियाः देशवासिनः, भवन्तः जानन्ति यदागामिनि रविवासरे ओक्टोबरस्य अन्तिमे दिने सरदारपटेलमहाभागस्य जन्मजयन्ती आपद्यते। 'मनकीबात'-प्रसारणस्य प्रत्येकं श्रोतुः आत्मनश्च पक्षतः अहम् अस्मै लौहपुरुषाय प्रणमामि।

सखायः, दिनमिदं वयं राष्ट्रिय-एकता-दिवसत्वेन पालयामः। अस्माकं दायित्वं यद्वयं ऐक्यसंदेशप्रदात्रा केनचिदपि कार्येण अवश्यं सम्बद्धाः स्याम। भवता दृष्टं स्यात् - सद्यः एव गुजरातारक्षिभिः कच्छक्षेत्रस्य लखपतदुर्गतः 'स्टैच्यू ऑफ यूनिटी' इत्येतावत्-पर्यन्तं

बाइक्-रैली-इति यन्त्र-द्विचक्रिकाभिः साकं सामूहिक-प्रयाणम् आयोजितम् । त्रिपुरारक्षिणः तु ऐक्यदिवसं पालयितुं त्रिपुरातः 'स्टैच्यू ऑफ यूनिटीं' प्रति यन्त्र-द्विचक्रिकाभिः साकं सामूहिक-प्रयाणम् संचालयन्ति; अर्थात् पूर्वतः पश्चिमं यावत् देशं संयोजयन्ति। जम्मू-काश्मीरारक्षिबलस्य कर्मिणः उरीतः पठानकोटं यावत् एतादृशस्यैव सामूहिक-प्रयाणस्य आयोजनेन देशाय ऐक्यसंदेशम् अर्पयन्ति। अहमेतेभ्यः आरक्षिभ्यः नमामि। जम्मू-काश्मीरे कुपवाड़ा-जनपदस्य कासाञ्चन भगिनीनां विषये मया ज्ञातमस्ति। एताः भगिन्यः काश्मीरे सेनानां शासकीय-कार्यालयानां च कृते त्रिवर्णध्वज-सीवनस्य कार्यं कुर्वन्ति। एतत्कार्यं देशभक्तिभावनया आपूरितमस्ति। अहं एतासां भगिनीनां भावं सुबहु प्रशंसे । भवद्भिरपि भारतस्य एकतायै श्रेष्ठतायै च यत्किमपि अवश्यं करणीयम्। भवन्तः अनुभविष्यन्ति यदेतेन मनसि कियती शान्तिः अवाप्यते ।

सखायः, सरदारपटेलमहाभागः कथयति स्म यद्वयं सम्भूयोद्यमेनैव देशं नूतनोन्नतिं नेतुं शक्नुमः। यद्यस्मासु ऐक्यं न भवेत्तर्हि वयमात्मानं स्वयमेव नित्यं नवीनासु आपत्सु पातयिष्यामः। यदि राष्ट्रिय-ऐक्यमस्ति तर्हि उन्नतिः अस्ति, विकासः चास्ति। वयं सरदारपटेलमहाभागस्य जीवनेन विचारैश्च प्रभूतमवगन्तुं शक्नुमः।

देशस्य सूचनाप्रसारणमन्त्रालयेन सद्यः एव सरदारपटेलमहाभागस्य चित्रात्मकं जीवनचरितं प्रकाशितम् । अहमिच्छामि यदस्माकं सर्वे युव-सखायः अस्याध्ययनम् अवश्यं कुर्वन्तु। एतेन भवतां कृते मनोरंजकरूपेण सरदारपटेलमहाभागस्य विषये ज्ञानप्राप्तेः अवसरः लप्स्यते।

प्रियाः देशवासिनः, जीवनं सततं प्रगतिमिच्छति, विकासं कांक्षते, उच्चत्वं लंघयितुमिच्छति। विज्ञानं विकसतु, प्रगतिः सजवं प्रसरतु, भवनानि भव्यानि भवन्तु; परं जीवनं तदापि अपूर्णत्व-मनुभवति। परं यदैतस्मिन् गीत-संगीत-कला-नाट्य-नृत्य-साहित्यादिकञ्च युज्यते तदैतस्य आभा प्राणवत्ता च नैकधा अभिवर्धते। यदि जीवनं सार्थकं करणीयमस्ति तर्हि एतेषां संयोजनमावश्यकं भवति। एतेनैव कथ्यते यदेताः विधाः अस्माकं जीवने उत्प्रेरकमिव भवन्ति, अस्माकम् ऊर्जां वर्धयन्ति। मानवानां अन्तर्मनसः विकासार्थं, अन्तर्यात्रायै च मार्गसंधानार्थं गीत-संगीतयोः विभिन्नकलानां च महती भूमिका भवति। एतेषां शक्तिरद्भुता यां न तु कालः बध्नाति, नैव च मत-मतान्तराणि अवरोधयन्ति। अमृत-महोत्सवेऽपि स्वीयकला-संस्कृति-गीत-संगीतानां वर्णाः अवश्यं पूरणीयाः । अहमपि भवतां पक्षतः

अमृतमहोत्सवस्य, गीत-संगीत-कलानां च सामर्थ्यविषयकान् अनेकान् परामर्शान् प्राप्नोमि। एते परामर्शाः मम कृते मूल्यवन्तः सन्ति। मयैते संस्कृतिमन्त्रालये अध्ययनार्थं प्रेषिताः। सन्तुष्टः अस्मि यत् मन्त्रालयेन अल्पसमये एव एतेषु प्रस्तावेषु गभीरतया कार्यं सम्पादितम् । एतेषु अन्यतमः परामर्शः, देशभक्ति-गीतानां स्पर्धायोजनमस्ति। स्वातन्त्र्यसंघर्षे विविधभाषा-उपभाषासु देशभक्तिगीतैः भजनैश्च देशः ऐक्यभावेन बद्धः आसीत्। साम्प्रतम् अमृतकाले अस्माकं युवानः देशभक्तेः गीतानि रचयित्वा अस्मिन्नायोजने शक्तिसंयोजनं कर्तुमर्हन्ति। देशभक्तेः एतानि गीतानि मातृभाषायां, राष्ट्रभाषायाम् आंग्लभाषायां वा लेखितुं शक्यन्ते। परमेतानि अवश्यमेव नूतनभारतस्य नवसंकल्पं धारयन्तु, देशस्य साफल्येन उत्प्रेरणमादाय भविष्यस्य कृते संकल्पसाधनाय भवन्तु । संस्कृतिमन्त्रालयस्य सन्नद्धता मण्डलतः राष्ट्रियस्तरं यावत् स्पर्धायोजनस्य वर्तते।

सखायः! एवंप्रकारेण एव 'मनकीबात'-प्रसारणस्य केनचित् श्रोत्रा परामर्शः प्रदत्तः यत् अमृतमहोत्सवः रङ्गावली-कलया सह योजनीयः । अत्र रङ्गावली-माध्यमेन उत्सवेषु विविधवर्ण-पूरणस्य परम्परा आबहोः कालात् अस्ति । रङ्गावल्यां देशस्य विविधता दृश्यते । विभिन्नेषु

राज्येषु, विभिन्नैः नामभिः, विभिन्नेषु प्रसङ्गेषु रङ्गावली निर्मिता भवति । अत एव संस्कृतिमन्त्रालयः अपि एतत्सम्बद्धाम् एकां राष्ट्रियस्पर्धाम् आयोजयति । कल्पनां कुर्वन्तु, यदा स्वतन्त्रतान्दोलन-सम्बद्धा रङ्गावली निर्मिता भविष्यति, जनाः स्वद्वारेषु, भित्तिषु, कस्यचित् स्वातन्त्र्योन्मत्तस्य चित्रं रचयिष्यन्ति, स्वतन्त्रतासम्बद्धां काञ्चन घटनां वर्णैः प्रदर्शयिष्यन्ति, तदा, अमृतमहोत्सवस्य आभा इतोऽपि वर्धिष्यते ।

सखायः! एकः अन्यः प्रकारः अत्र लोरी-इति वात्सल्यगीतेः अपि अस्ति । अस्माकं परम्परासु लोरी-इति वात्सल्यगीतिभिः शिशुभ्यः संस्काराः दीयन्ते, संस्कृत्या तेषां परिचयः कार्यते । लोरीति वात्सल्यगीतेः अपि काचित् विविधता अस्ति । किमर्थं न वयम्, अमृतकाले, एतस्याः कलायाः पुनरुज्जीवनं करवाम, अथ च, देशभक्तिभरिताः एतादृश्यः वात्सल्यगीतयः लिखेम, कविताः, गीतानि, किञ्चित् वा तादृशम् अवश्यं लिखेम यादृशं, प्रत्येकं गृहे मातरः लघुबालेभ्यः श्रावयितुं शक्नुयुः । एतासु वात्सल्यगीतिषु आधुनिकभारतस्य सन्दर्भः स्यात्, एकविंशतितम-शताब्दस्य भारतस्य स्वप्नानां दर्शनं स्यात् । भवतां समेषां श्रोतॄणां परामर्शानुसारं मन्त्रालयेन एतत्सम्बद्धायाः स्पर्धायाः आयोजनस्य निर्णयः स्वीकृतः ।

सखायः! एताः तिस्रः अपि प्रतियोगिताः ओक्टोबरमासस्य एकत्रिंशत्-दिनाङ्कतः सरदार-पटेल-वर्यस्य जयन्तीतः आरप्स्यन्ते । आगामिदिनेषु संस्कृतिमन्त्रालयः एतत्सम्बद्धाः सूचनाः प्रदास्यति । एताः सूचनाः मन्त्रालयस्य जालपुटे अपि उपलप्स्यन्ते, अथ च सञ्चारमाध्यमेषु अपि प्रकाशिताः भविष्यन्ति । अहम् इच्छामि - भवन्तः सर्वे अपि एताभिः सम्बद्धाः स्युः । अस्माकं युवसहयोगिनः अवश्यम् अत्र स्वकलायाः स्वप्रतिभायाः च प्रदर्शनं कुर्युः । एतेन भवतां क्षेत्रस्य कलासंस्कृती अपि देशस्य सर्वदिग्भागेषु प्राप्स्यतः, भवतां कथाः सम्पूर्णदेशः श्रोष्यति ।

प्रियाः देशवासिनः! इदानीं वयम् अमृतमहोत्सवे देशस्य पुण्यात्मस्वरूपान् वीरपुत्रान् वीरपुत्रीः च स्मरामः । आगामिमासे नवम्बरमासस्य पञ्चदशदिनाङ्के अस्माकं देशस्य एतादृशस्य एव महापुरुषस्य, वीरयोद्धुः, भगवतः बिरसा-मुण्डा-वर्यस्य जन्म-जयन्ती आगम्यमाना अस्ति । भगवान् बिरसा-मुण्डा 'धरती-आबा' इत्याख्यया अपि प्रसिद्धः अस्ति । किं भवन्तः जानन्ति? एतस्य कः अर्थः भवति ? एतस्य अर्थः अस्ति - पृथ्वीपिता इति । यथा भगवान् बिरसामुण्डा स्वसंस्कृतये, वनेभ्यः, भूमिरक्षायै च सङ्घर्षं कृतवान्, तथा पृथ्वीपिता

एव कर्तुं शक्नोति स्म । सः अस्मान् संस्कृतिं प्रति मूलं प्रति च गर्वानुभूतिं शिक्षितवान् । वैदेशिकशासकैः सः नैकवारं आह्वानवचनैः सूचितः, बलम् आचरितं, परं तथापि सः आदिवासिसंस्कृतिं नैव त्यक्तवान् । प्रकृतिपर्यावरणाभ्यां सह यदि प्रेमकरणं शिक्षणीयं तर्हि तदर्थम् अपि पृथ्वीपिता भगवान् बिरसामुण्डा एव अस्मभ्यं बृहत्प्रेरणाभूतः अस्ति । तेन वैदेशिकशासनस्य तस्याः प्रत्येकं नीतेः सर्वथा विरोधः कृतः, या पर्यावरणहानये आसीत् । निर्धनानां सङ्कटापन्नानां जनानां च सहयोगाय भगवान् बिरसामुण्डा सर्वदा अग्रगण्यः आसीत् । सामाजिकविसङ्गतीः समापयितुं सः समाजं जागरूकम् अपि अकरोत् । उलगुलान्-आन्दोलने तदीयं नेतृत्वं को वा विस्मर्तुं शक्नोति? एतेन आन्दोलनेन आङ्ग्लीयाः विचलिताः जाताः । यस्य अनन्तरं आङ्ग्लजनैः भगवत्-बिरसा-मुण्डायाः निग्रहणार्थं बृहत्पुरस्कारः अपि घोषितः । आङ्ग्लशासकैः सः कारागारं प्रेषितः येन आयुषः पञ्चविंशत्याः अपि न्यूनसमये सः अस्मान् अत्यजत् । सः अस्मान् अत्यजत्, परं केवलं तदीयशरीरेण ।

जनमानसेषु तु भगवान् बिरसामुंडा चिरं विराजते । तदीयं जीवनं जनेभ्यः प्रेरणाशक्तितत्वेन अस्ति । अद्यापि तदीयानि साहस-

वीरता-भरितानि लोकगीतानि, कथाः च भारतस्य मध्यक्षेत्रे अत्यन्तं प्रसिद्धाः सन्ति । अहं ‘धरती-आबा’-इत्याख्यं बिरसा-मुण्डा-वर्यं नमामि, युवभ्यः च आग्रहं करोमि यत् बिरसामुण्डा-वर्यस्य विषये इतोऽपि पठन्तु जानन्तु च । भारतस्य स्वतन्त्रतासङ्ग्रामे अस्माकं आदिवासिसमूहस्य विशिष्टयोगदानविषये भवन्तः यावत् ज्ञास्यन्ति, तावद् एव गौरवम् अनुभविष्यन्ति ।

मम प्रियाः देशवासिनः! अद्य ओक्टोबर-मासस्य चतुर्विंशे दिने, UN Day अर्थात् ‘सयुंक्तराष्ट्रदिवसः’ आचर्यते । एतस्मिन् दिने एव सयुंक्त-राष्ट्रस्य सङ्घटनं जातम्, सयुंक्तराष्ट्रस्य स्थापनाकालतः एव भारतम् एतेन सम्बद्धम् अस्ति । किं भवन्तः जानन्ति यत् भारतेन स्वतन्त्रतायाः पूर्वम् ऊनविंश-शताब्दे पञ्चचत्वारिंशत्तमे वर्षे एव सयुंक्तराष्ट्रस्य अधिकारपत्रं हस्ताक्षरितम् आसीत् । संयुक्तराष्ट्र-सम्बद्धः कश्चन विशिष्टांशः एषः अस्ति यत् सयुंक्तराष्ट्रस्य प्रभावस्य तच्छक्तेः च वर्धने, भारतस्य नारीशक्त्या, बृहती भूमिका निर्व्यूढा। ऊनविंश-शताब्दे सप्तचत्वारिंशत्तमवर्षतः अष्टचत्वारिंशत्तमवर्ष-पर्यन्तं यदा संयुक्तराष्ट्रमानवाधिकाराणां वैश्विकं घोषणापत्रं सिद्धं जायमानम् आसीत् तदा तस्मिन् घोषणापत्रे लेख्यमानम् आसीत् -**“All**

**Men are Created Equal" इति**, परं भारतस्य एकेन प्रतिनिधिना अत्र आपत्तिः सूचिता, फलतः वैश्विकघोषणापत्रे लेखनं जातम् - **"All Human Beings are Created Equal" इति** । एषः विषयः भारतस्य सहस्राधिक-वर्ष-प्राचीनपरम्परायाः लिङ्गसाम्यस्य अनुरूपः वर्तते । किं भवन्तः जानन्ति यत् श्रीमती हंसामेहता सा प्रतिनिधिः आसीत् यस्याः कारणेन एतद् सम्भवं जातम्, तदानीम्, एका अन्या प्रतिनिधिः श्रीमती लक्ष्मीमेनन् अपि लिङ्गाधृतायाः समानतायाः विषये स्वविषयं सुदृढं स्थापितवती । न एतावद् एव, ऊनविंश-शताब्दे त्रि-पञ्चाशत्तमे वर्षे श्रीमती विजयालक्ष्मीपण्डितः, संयुक्तराष्ट्रसङ्घस्य सामान्य-सभायाः प्रथमा महिला अध्यक्षा अपि आसीत् ।

सखायः, वयं तस्याः भूमेः जनाः स्मः, ये विश्वासन्ति, ये एतां प्रार्थनां कुर्वन्ति -

ॐद्यौ: शान्तिरन्तरिक्षँ शान्ति:,

पृथ्वी शान्तिराप: शान्तिरोषधय: शान्ति:।

वनस्पतय: शान्तिर्विश्वे देवा: शान्तिर्ब्रह्म शान्ति:,

सर्वँ शान्ति:, शान्तिरेव शान्ति:, सा मा शान्तिरेधि।।

ॐ शान्ति: शान्ति: शान्ति:।।

भारतेन सदैव विश्वशान्तये कार्यं कृतम् । एतस्मिन् विषये गर्वान्विताः स्मः यत् भारतम् ऊनविंश-शताब्दस्य पञ्चम-दशकाद् निरन्तरं सयुंक्त-राष्ट्र-शान्ति-मिशन् इत्यस्य अङ्गभूतम् अस्ति । निर्धनतापसारणस्य, जलवायुपरिवर्तस्य, अथ च, श्रमिकसम्बद्धानां विषयाणां समाधानाय अपि भारतम् अग्रणीं भूमिकां निभालयति । एतद् अतिरिच्य योगम् आयुषं च लोकप्रियं कर्तुं भारतं WHO अर्थात् विश्वस्वास्थ्यसङ्घटनेन सह मिलित्वा कार्यं कुरुते । ऐषमः मार्चमासे विश्वस्वास्थ्य-सङ्घटनेन घोषणा कृता आसीत् यत् भारते पारम्परिक-चिकित्सायै किञ्चन वैश्विकं केन्द्रं स्थापयिष्यते इति ।

प्रियाः सखायः! संयुक्तराष्ट्रसङ्घविषये वार्तालापं कुर्वतः अटलबिहारि-वाजपेयिवर्यस्य शब्दाः अद्यापि मया स्मर्यन्ते । विगते शताब्दे सप्त-सप्ततितमे वर्षे संयुक्तराष्ट्रसङ्घं हिन्दीभाषया सम्बोधयन् तेन ऐतिह्यं विरचितमासीत् । अद्यापि 'मनकीबात' इत्यस्य श्रोतृभ्यः अटलवर्यस्य तस्य सम्बोधनस्य भागमेकं श्रावयितुमिच्छामि । श्रूयन्ताम् - '...................................'

अत्र अहं राष्ट्रस्य सत्तायाः महत्त्वस्य च विषये न चिन्तयामि । सामान्यजनानां प्रतिष्ठा प्रगतिः च मत्कृते आधिक्येन महत्त्वपूर्णे स्तः । अन्ततोगत्वा अस्माकं साफल्यं वैफल्यं वा केवलम् एकेन एव मानदण्डेन तोलनीयं यत् सम्पूर्णः मानवसमाजः प्रत्येकं नृभ्यः, नारीभ्यः, बालेभ्यः च गौरवस्य आश्वस्तिप्रदानाय प्रयत्नशीलः अस्ति ।

प्रियाः सखायः! अटलवर्यस्य एतानि वृत्तानि अद्यापि अस्मभ्यं दिङ्निर्देशं कुर्वन्ति । समीचीनतया सुरक्षितत्वेन भूमण्डलरूपेण एतां भूमिं विनिर्मातुं भारतस्य योगदानं विश्वस्मै महती प्रेरणा विद्यते ।

प्रिया: देशवासिनः! अधुना कतिपयेभ्यः दिनेभ्यः पूर्वमेव ओक्टोबरमासस्य एकविंशतितमे दिनाङ्के वयम् आरक्षक-स्मृतिदिवसम् आचरितवन्तः । आरक्षकाणां यानि मित्राणि देशसेवायै स्वप्राणान् समर्पितवन्ति तानि अस्मिन् दिवसावसरे वयं विशेषेण स्मरामः । अहम् अद्य एतैः आरक्षकैः सह तेषां कुटुम्बजनान् अपि स्मर्तुम् इच्छामि । कुटुम्बजनानां साहाय्यं त्यागं च विना आरक्षकसदृशी कठिना सेवा दुष्करा एव । आरक्षकसेवया सह युक्ता इतोऽपि एका वार्ता अस्ति याम् अहं

'मनकीबात'-श्रोतॄन् वक्तुमिच्छामि । पूर्वम् एषा धारणा विनिर्मिता आसीत् यत् सेना-सदृशी, आरक्षकसदृशी वा सेवा केवलं पुरुषेभ्यः एव भवति । परन्तु अद्य तथा नास्ति । आरक्षकानुसन्धानविकासविभागस्य सङ्ख्यानुसारं विगतेषु कतिपयेषु वर्षेषु महिला-आरक्षिकाणां सङ्ख्या द्विगुणिता जाता ।

चतुर्दशाधिकद्विसहस्रतमे वर्षे एषा सङ्ख्या प्रायशः पञ्चसहस्राधिकैकलक्षमिता आसीत् । विंशत्यधिक-द्विसहस्रतमं वर्षं यावत् एषा सङ्ख्या द्विगुणिता सती पञ्चदशसहस्राधिक-द्विलक्षमिता जाता । केन्द्रीय-सशस्त्र-आरक्षक-बले (Central Armed Police Forces) अपि विगतेभ्यः सप्त-वर्षेभ्यः एषा सङ्ख्या प्राय: द्विगुणिता जाता । किञ्च अहं केवलं सङ्ख्याविषये एव न वदामि, अपि तु अद्यत्वे देशस्य पुत्र्यः पूर्णतया, निज-शक्त्या, स्वीयेन सामर्थ्येन च कठिनतमानि दायित्वानि निर्वहन्ति। उदाहरणार्थं सर्वाधिके कठिनप्रशिक्षणे विशिष्टवन्य-शुद्धबलस्य (Specialised Jungle Warfare Commandos) सर्वाधिके कठोरप्रशिक्षणे अनेकाः पुत्र्यः भागं गृह्णन्ति । एताः च अस्माकं कोबरा-बटालियन् - इत्यस्य भागभूताः भविष्यन्ति ।

प्रियाः सखायः! अद्य वयं विमानस्थानकं मेट्रोस्थानकं वा गच्छामः । शासकीयं कार्यालयं वा अवलोकयामः । तत्र-तत्र केन्द्रीय-औद्योगिक-सुरक्षाबलस्य (CISF) महिलाः प्रत्येकं संवेद्यस्थलस्य सुरक्षायै दृश्यन्ते । अस्य अत्यन्तं सकारात्मक-प्रभावः न केवलम् आरक्षकबले भवति, अपितु समाजमानसे अपि भवति । महिला-सुरक्षाकर्मिणाम् उपस्थित्या जनेषु, विशिष्टतया महिलासु सहजः कश्चन विश्वासः उत्पद्यते । स्वभाविकरूपेण महिलारक्षिकाभिः सह ताः महिलाः संयुक्तताम् अनुभवन्ति । महिलानां संवेदनशीलतायाः कारणेन जनाः तासु आधिक्येन विश्वसन्ति । अस्माकम् एताः महिलारक्षिकाः देशस्य लक्षशः पुत्रीभ्यः आदर्शभूताः जायमानाः सन्ति । अहं सर्वाः महिलारक्षिकाः अनुरुन्धे यत् विद्यालयोद्घाटनानन्तरं स्वीय-क्षेत्रस्य विद्यालयान् गत्वा तत्रत्याभिः बालाभिः सह संभाषणं कुर्वन्तु । अहं विश्वसिमि यत् अमुना संभाषणेन नूतनायै सन्ततये काचित् दिक् प्राप्येत । न केवलम् एतावत्, अपितु अनेन प्रयत्नेन जनानां विश्वासः अपि वर्धिष्यते । अहम् आशासे यत् एतदपेक्षया अपि अत्यधिकया सङ्ख्यया महिलाः आरक्षिसेवायां सम्मिलिताः भविष्यन्ति

। अस्माकं देशस्य नवयुगीनारक्षकाणां(New Age Policing) नेतृत्वम् एताः करिष्यति।

मम प्रियाः देशवासिनः! विगतेभ्यः कतिपयेभ्यः वर्षेभ्यः अस्माकं देशे आधुनिकप्रविधेः उपयोगः महता प्रमाणेन वर्धमानः वर्तते । अस्मिन् विषये 'मनकीबात'-प्रसारणस्य श्रोतारः स्वीयान् अभिप्रायान् लिखन्ति । अद्य अहम् एतादृशम् एकं विषयं चर्चयितुम् इच्छामि । यः विशेषेण अस्माकं देशस्य यूनां, लघूनां बालानां च कल्पनासु व्याप्तः अस्ति । एषः विषयः Drone- इति नियन्त्रक-चालित-विमान-प्रविधिसम्बद्धः वर्तते । कतिपयेभ्यः वर्षेभ्यः पूर्वं यदा कुत्रापि नियन्त्रकचालितविमानस्य(Drone) नाम श्रूयते स्म तदा जनानां मनस्सु कः भावः भवति स्म? सेनायाः शस्त्रस्य युद्धस्य वा भावः जायते स्म । परन्तु अद्य यदा अस्माकं स्थाने कस्यचित् विवाहस्य वरयात्रिकाणां वा कार्यक्रमः भवति तदा नियन्त्रकचालित-विमानेन(Drone) निर्मीयमाणानि भावचित्राणि चलच्चित्राणि च दृग्गोचराणि भवन्ति । नियन्त्रकचालितविमानस्य परिमितिः परिधिः वा तावान् एव न वर्तते । भारतं विश्वस्य तादृशेषु देशेषु गण्यते यत्र नियन्त्रकचालितविमानसाहाय्येन ग्रामीण-भूमिसम्बद्धाः अङ्कीया-

भिलेखाः (Digital Record) सज्जीक्रियन्ते । भारते नियन्त्रकचालित-विमानस्य उपयोगः परिवहनाय महता प्रमाणेन जायमानः वर्तते । ग्रामे कृषिकार्येषु, गृहे वस्तुप्रापणं, आपत्काले साहाय्यं, विधिव्यवस्थापर्यवेक्षणं वा भवतु , एतादृशीभ्यः सर्वविधाभ्यः आवश्यकताभ्यः शीघ्रम् एव वयं नियन्त्रकचालितविमानस्य उपयोगं द्रक्ष्यामः । एतेषु बहूनाम् आरम्भस्तु जातः । कतिपयेभ्यः दिनेभ्यः पूर्वं गुजरातस्य भावनगरे नियन्त्रकचालितविमानेन कृषिक्षेत्रेषु नैनो-यूरिया-इति अतिसूक्ष्मतरलीयस्य उर्वरकस्य अभिसेचनं कृतम् । कोविड्-सूच्यौषधाभियाने अपि नियन्त्रकचालितविमानानि स्वीयभूमिकां निर्वहन्ति । एतादृशं दृश्यं मणिपुरे दृष्टं यत्र एकं द्वीपं प्रति सूच्यौषधानि प्रापितानि । तेलङ्गाना-राज्यम् अपि नियन्त्रकचालित-विमानस्य सूच्यौषधप्रापणाय प्रयत्नम् अकरोत् । न केवलम् एतावत् अपि तु अधुना संसाधनगतानाम् अनेकासां परियोजनानां पर्यवेक्षणाय अपि नियन्त्रकचालितविमानस्य उपयोगः जायते । अहम् एतादृशस्य एकस्य युवच्छात्रस्य विषये पठितवान् यः नियन्त्रकचालितविमानेन धीवराणां जीवनं रक्षितवान् ।

सखायः! अस्मिन् क्षेत्रे एतावन्तः नियमाः विधयः प्रतिबन्धाः च आसन् येन नियन्त्रकचालितविमानस्य वास्तविक-क्षमतायाः उपयोगः न सम्भवति स्म । यः प्रविधिः अवसरत्वेन द्रष्टव्यः आसीत्सः सङ्कटत्वेन दृष्टः । यदि भवान् कस्मै अपि कार्याय नियन्त्रकचालितविमानम् उड्डाययितुम् इच्छति तर्हि अनुज्ञापत्राय (License) अनुमत्यै च एतावन्त: क्लेशाः आसन् यै: जनाः प्रवृत्ताः न भवन्ति स्म । वयं निश्चितवन्तः यत् एतादृशी मनोवृत्ति: अपसारणीया, नूतना अभिवृत्तिः काचित् निर्मेया । ओगस्ट-मासे २५-तमे दिनाङ्के नूतना काचित् नीति: आनीता । एषा नीतिः नियन्त्रकचालित-विमानसम्बद्धयोः वर्तमान-भविष्ययो: सम्भावनायाः आधारेण विनिर्मिता अस्ति । अत्र अधुना, न तु बहूनि आवेदनानि करणीयानि, न वा पूर्ववत् शुल्कं प्रदेयं भविष्यति । अहम् एतं विषयं वक्तुं हर्षम् अनुभवामि यत् नूतननियन्त्रकचालितविज्ञाननीतेः अनन्तरं बहवः वैदेशिका: भारतीयाः च अत्र निवेशं कृतवन्तः । नैकाः संस्थाः निर्माणविभागम् अपि कल्पयन्ति ।

जलस्थलवायुसैन्यबलैः भारतीयाभ्यः नियन्त्रकचालितविमान-संस्थाभ्यः पञ्चशतकोट्यधिकानां रूप्यकाणां निर्माणाय अवसरः प्रदत्तः

। इदानीं तु आरम्भः वर्तते । अस्माभिः अत्रैव न स्थातव्यम् । अस्मिन् प्रविधौ सर्वदेशेषु अग्रिमस्थानं प्राप्तव्यम् । एतदर्थं प्रशासनं सर्वसम्भवान् प्रयासान् करोति । अहं देशस्य यून: वक्तुमिच्छामि यत् ते नियन्त्रकचालितविमाननीतेः अनन्तरम् अवसराणां लाभप्राप्तये अवश्यं चिन्तयेयुः अग्रे च आगच्छेयुः ।

मम प्रियाः देशवासिनः, 'मनकीबात'-प्रसारणस्य अन्यतमा श्रोत्री उत्तरप्रदेशस्य मेरठ-नगरस्य श्रीमती प्रभाशुक्ला स्वच्छता-सम्बद्धं पत्रमेकं मां प्रेषितवती | सा अलिखत् यत् - "भारतदेशे पर्वावसरेषु वयं सर्वेऽपि स्वच्छताम् अनुपालयामः | तथैव, यदि वयं स्वच्छतां, दैनिक-प्रवृत्तित्वेन आचरेम चेत्, अशेष-देशः स्वच्छः भविष्यति |" प्रभा-महाभागायाः विचारोऽयं मह्यम् अरोचत | वस्तुतस्तु, यत्र स्वच्छता, तत्र स्वास्थ्यम्, यत्र स्वास्थ्यम्, तत्र सामर्थ्यम्, तथा च, यत्र सामर्थ्यम्, तत्र समृद्धिः विराजते | अत एव, देशः स्वच्छभारताभियानम् एतावत् सबलं प्रवर्तयति |

सखायः, अहं सपारोम-नयासराय-इति राँची-सन्निकटस्य ग्रामस्य विषये ज्ञात्वा अतितरां प्रसन्नताम् अन्वभवम् | अस्मिन् ग्रामे एकः तडागः आसीत्, परञ्च, जनाः तडाग-स्थानं 'अनावृते शौचार्थम्' प्रयुञ्जमानाः प्रावर्तन्त | स्वच्छभारताभियानस्य अन्तर्गतं यदा सर्वेषां गृहेषु शौचालयाः निर्मिताः जाताः तदा ग्रामवासिनः विचारितवन्तः यत् कथन्न ग्रामस्य स्वच्छीकरणेन साकमेव सुंदरीकरणमपि भवेत् | ततः

परं किम्, सर्वेऽपि सम्भूय तडाग-स्थानम् उद्यानत्वेन परिवर्तितवन्तः | अधुना तत् स्थानं जनानां कृते, बालानां च कृते, सार्वजनिकस्थानत्वेन विराजते | अमुना सम्पूर्णस्यापि ग्रामस्य जीवने सुमहत् परिवर्तनम् आयातम् | अहं भवतः छत्तीसगढ़स्य देऊर-ग्रामस्य महिलानां विषयेऽपि सूचयितुम् इच्छामि | अत्रत्याः महिलाः स्वयं- सहायतासमूहमेकं संचालयन्ति तथा च, मिलित्वा ग्रामस्य चत्वराणां, मार्गाणां, मंदिराणां च स्वच्छतां कुर्वन्ति |

सखायः, उत्तरप्रदेशस्य गाज़ियाबादस्य रामवीरतंवर-वर्यं जनाः 'Pond Man'-इति नाम्ना जानन्ति | रामवीर-महोदयः mechanical-engineering -इति यान्त्रिकाभियन्तृ-विधायाः अध्ययनं कृत्वा भृति-वृत्तिं कुर्वन् आसीत् | परञ्च तस्य मनसि स्वच्छतायाः तादृशी उग्रा समीहा अजायत यत् सः भृति-वृत्तिं त्यक्त्वा तडागानां स्वच्छता-कर्मणि संलग्नः जातः | रामवीर-महोदयः अधुना-पर्यन्तं बहूनां तडागानां स्वच्छीकरणं कृत्वा तान् पुनर्जीवितान् व्यदधात् |

सखायः, स्वच्छतायाः प्रयासाः तदैव पूर्णतया सफलाः भवन्ति यदा प्रत्येकमपि नागरिकः स्वच्छता-सन्धारणं स्वीय-दायित्वमिति अवगच्छेत् | सम्प्रति वयं सर्वे दीपावली-पर्वणि स्वीय-गृहस्य स्वच्छता-कार्येषु तु सन्नद्धाः भविष्यामः एव | परञ्च एतस्मिन्नवधौ अस्माभिः एतदपि नूनं ध्यातव्यं यत् अस्मदीयं गृहमिव अस्माकं प्रतिवेशित्वमपि स्वच्छं भवेत् | एवं तु नैव स्यात् यत् वयं निज-गृहं तु स्वच्छं करवाम, परञ्च अस्मदीय-गृहस्य अवकराः स्वगृहात् बहिः, अस्माकं मार्गोपरि स्युः | अपि च, यदाहं

स्वच्छताविषयं सन्दर्भयामि, तदा कृपया ‘Single Use Plastic’- इति एकलोपयुज्य-घट्यातोः मुक्तिवृत्तं न कदापि अस्माभिः विस्मरणीयम् | तर्हि आयान्तु, वयं संकल्पयाम यत् स्वच्छभारताभियानस्य उत्साहं न मनागपि न्यूनं परिभावयिष्यामः | वयं सर्वे सम्भूय निजदेशं पूर्णतया स्वच्छं करिष्यामः स्वच्छं च सन्धारयिष्यामः |

मम प्रियाः देशवासिनः, पूर्णोऽपि ओक्टोबर-मासः पर्वणां वर्णैः रञ्जितोऽस्ति, तथा चेतः परम्, कतिपय-दिनानाम् अनन्तरं दीपावली तु आगच्छन्ती एवास्ति | दीपावली, तदनन्तरं गोवर्धनपूजा, ततः परं भ्रातृद्वितीया, एतानि त्रीणि पर्वाणि तु भविष्यन्त्येव, अस्मिन्नेवावधौ छठपूजा- इति सूर्यषष्ठी-पूजा अपि भविता | नवम्बर-मासे एव गुरोः नानकदेवस्य जयंती अप्यस्ति | एतावन्ति पर्वाणि युगपदेव आयान्ति, तर्हि तेषां कृते सज्जाः अपि बहु-पूर्वम् आरभन्ते | भवन्तः सर्वेऽपि अधुनावधितः क्रयणार्थं समुपकल्पयितुम् आरभन्त - इति मन्ये, परञ्च किमु भवन्तः स्मरन्ति वा, क्रयणम् अर्थात् ‘VOCAL FOR LOCAL’ - स्थानिकोत्पादानां कृते विशेषाग्रहः | भवन्तः स्थानिकोत्पादान् क्रेष्यन्ति चेत् भवतां पर्व अपि प्रकाशिष्यते, तथा च, कस्यचन निर्धनस्य भगिनी-भ्रातुः, कस्यचन कर्मकरस्य, कस्यचन तन्तुवायस्य च गृहेऽपि प्रकाशो भविता | दृढतया विश्वसिमि यत् वयं सर्वे मिलित्वा यदभियानम् आरब्धवन्तः, साम्प्रतं पर्वावसरेषु इतः परमपि दृढतरं भविता | भवन्तः भवदीयान् स्थानीयान् उत्पादान् क्रीणन्तु, तेषां च सूचनां सामाजिक-सञ्चारमाध्यमेषु अपि सम्विभाजयन्तु | स्व-सम्बद्धान्

जनान् अपि सूचयन्तु | आगामिनि मासे वयं पुनः मेलिष्यामः, तथा च, पुनरपि एतादृशान् बहून् विविध-विषयान् चर्चयिष्यामः |

भवतां सर्वेषां कृते कोटिशो धन्यवादाः!   नमस्कारः!

*****

[भाषान्तरम् - सर्वश्री-श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com